**SET – 4**

**Series : GBM/1**

**कोड नं.**
**Code No. 22/1**

**रोल नं.**
**Roll No.** | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (केन्द्रिकम्)

# SANSKRIT (Core)

*अवधि : होरात्रयम्* | *पूर्णाङ्का: : **100***
*निर्धारित समय : 3 घंटे* | *अधिकतम अंक : **100***
*Time allowed : **3** hours* | *Maximum marks : **100***

***निर्देशा: :***

*सङ्केताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*

*जहाँ स्पष्ट संकेत नहीं हैं, वहाँ उत्तर संस्कृत में ही दीजिए ।*

*Answer the questions in Sanskrit only unless stated otherwise.*

*अस्मिन् प्रश्नपत्रे **चत्वार:** खण्डा: सन्ति ।*

*इस प्रश्न-पत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | | |
|---|---|---|---|
| खण्ड: क | : | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन ) | **10 अङ्का:** |
| SECTION A | : | (Unseen Reading Comprehension) | |
| खण्ड: ख | : | संस्कृतेन रचनात्मककार्यम् (संस्कृत रचनात्मक कार्य) | **15 अङ्का:** |
| SECTION B | : | (Sanskrit Writing Skills) | |
| खण्ड: ग | : | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | **30 अङ्का:** |
| SECTION C | : | (Applied Grammar) | |
| खण्ड: घ | : | भाग I – पठितांश – अवबोधनम् (पठितांश – अवबोधन) | **35 अङ्का:** |
| SECTION D | : | PART I – Reading Comprehension | |
| | | भाग II – सामान्य: संस्कृतसाहित्यपरिचय: (सामान्य संस्कृत साहित्य-परिचय) | **10 अङ्का:** |
| | | PART II – General Introduction to Sanskrit Literature | |

## खण्ड: क (SECTION A) **10 अङ्का:**

### अपठितांश – अवबोधनम्

### अपठितांश – अवबोधन

### Unseen Reading Comprehension

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।
निम्नलिखित गद्यांश को पढ़कर दिए गये प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following passage and answer the given questions in Sanskrit.

**गद्यांश :**

आधुनिके काले विश्वस्य समक्षम् एका नूतना समस्या समुत्पन्ना । विश्वस्य प्रत्येकं देश: येन केन प्रकारेण अनया पीडित: अस्ति । एषा समस्या अस्ति – आतंकवाद: । आतंकवादेन विश्वस्य नैकदेशेषु महान् रक्तपात:, सम्पत्तिहानिश्च प्रतिदिनं भवत: । निरीहजना: असमये एव मृत्युमुखं गच्छन्ति । आतंकवादस्य असहनीयं प्रहारम् अबोधबालका: स्त्रियश्च सोढुं विवशा: भवन्ति । भारतवर्षे कश्मीरक्षेत्रे एते आतंकवादिन: सैन्यबलानि लक्ष्यीकृत्य भीषणविस्फोटकानां प्रयोगं कुर्वन्ति, येन असमये एव भारतीय-सैनिका: वीरगतिं प्राप्नुवन्ति । अतएव अस्माकं प्रधानमन्त्रिणा स्पष्टं घोषितं यद् भारतम् आतंकवादस्य समाप्तिं प्रति कठोरान् उपायान् समाचरिष्यति । अस्मिन् प्रसंगे अस्माकं सैनिकै: सीम्न: रेखाम् उल्लङ्घ्य आतंकवादिनां नैकानि प्रशिक्षण-शिविराणि विनाशितानि । भारतीयभटानाम् अयं प्रयास: अभिनन्दनीय: ।

**प्रश्ना:**

(अ) एकपदेनोत्तरत । **½ × 4 = 2**
एक शब्द में उत्तर दीजिए ।
Answer in one word.
(i) कस्य समक्षं नूतना समस्या समागता ?
(ii) आतंकवादस्य विनाशार्थं क: कठोरोपायान् विधास्यति ?
(iii) भारतीयसैनिकै: आतंकवादिनां किं विनाशितम् ?
(iv) असमये के वीरगतिं प्राप्नुवन्ति ?

(ब) पूर्णवाक्येनोत्तरत । **1 × 2 = 2**
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence.
(i) भारतीयसैनिकै: सीम्न: रेखाम् उल्लङ्घ्य किं कृतम् ?
(ii) प्रधानमन्त्रिणा किं घोषितम् ?

(स) यथानिर्देशमुत्तरत । **1 × 4 = 4**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'काले' इत्यस्य विशेषणं किम् ?

(ii) 'जगत:' इत्यर्थे किं पर्यायपदम् अत्र प्रयुक्तम् ?

(iii) 'रक्षितानि' इत्यस्य विलोमपदं किम् ?

(iv) 'प्राप्नुवन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । **2**

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write a suitable title for this passage in Sanskrit.

## खण्डः ख (SECTION B) **15 अङ्काः**

## संस्कृतेन रचनात्मककार्यम्

## संस्कृत रचनात्मक कार्य

## Sanskrit Writing Skills

2. भवान् सुकेश: । भवतां मित्रं नचिकेता: प्राय: अस्वस्थ: वर्तते । तं बोधयितुं लिखिते पत्रे रिक्तस्थानानि मञ्जूषा-पदसाहाय्येन पूरयित्वा पत्रं पुन: लिखत ।

आप सुकेश हैं । आप के मित्र नचिकेता अस्वस्थ रहते हैं । उन्हें समझाने के लिए लिखे पत्र में मञ्जूषा में दिए गए शब्दों से रिक्त स्थान पूर्ति करके पत्र को पुन: लिखिए । **½ × 10 = 5**

You are Sukesh. Your friend Nachiketa generally remains ill. In this letter written by you for proper advice fill in the blanks with the help of the words given in the box & rewrite it.

**पत्रम्**

नवदिल्लीत:,
दिनाङ्क : _______

प्रिय मित्र (1) _______ !

नमो नम:,

भवत्सहोदरस्य (2) ज्ञातं यत् तव (3) अद्यत्वे समीचीनं नास्ति । मित्र ! स्वास्थ्यस्य रक्षा तु सर्वोपरि करणीया । यदि स्वास्थ्यं (4) न भवति, तर्हि (5) सुचारुरूपेण भवितुं न शक्नोति, येन च अन्तत: (6) भविष्योपरि दुष्प्रभाव: सम्भवति । अत: त्वं प्राकृतिक-चिकित्सया (7) प्रयासं कुरु । प्रात: (8) उद्यानं गत्वा (9) कुरु, ऋतो: अनुसारं भोजनं गृहाण । हरितशाक-फलादीन् (10) अधिकमात्रायां खाद । त्वं शीघ्रमेव स्वस्थो भविष्यसि । मातापितृचरणेषु मे प्रणामाञ्जलीन् निवेदय ।

तव अभिन्नहृदय:
सुकेश:

**मञ्जूषा**

| |
|---|
| पदार्थान्, नचिकेत:, योगाभ्यासम्, पत्रेण, अस्माकम्, उत्थाय, स्वास्थ्यलाभाय, अध्ययनमपि, सुचारु, स्वास्थ्यम् । |

3. मञ्जूषाप्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुन: लिखत । ½ × 10 = 5

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित लघुकथा में रिक्त स्थानों की पूर्ति कर कथा को पुन: लिखिए ।

Fill in the blanks of the following short story with the help of the words given in the box below and rewrite the same.

**कथा** :

कस्मिंश्चिद् ग्रामे कश्चन __(1)__ वृद्ध: आम्रवृक्षस्य आरोपणं करोति स्म । तं दृष्ट्वा __(2)__ आगच्छन् कश्चन युवा तं वृद्धम् __(3)__ "भो वृद्ध ! आम्रफलानि तु प्राय: द्वादश-वर्षानन्तरं __(4)__ । तव अवस्थां __(5)__ प्रतीयते यद् यदा अयं वृक्ष: __(6)__ दास्यति, तदा त्वं जीवित: न __(7)__ । अत: किं वृथा __(8)__ ?" एतत् निशम्य वृद्ध: तत्र फलयुक्तान् वृक्षान् इंगित्वा __(9)__ "यथा मया अन्यै: आरोपितानां वृक्षाणां फलानि खादितानि, एवमेव अन्येऽपि मया आरोपितानां वृक्षाणां फलानि खादिष्यन्ति – इति __(10)__ अहं वृक्षम् आरोपयामि ।

**मञ्जूषा**

| |
|---|
| विचार्य, अशीतिवर्षीय:, अकथयत्, नगराद्, परिश्रमेण, दृष्ट्वा, भविष्यसि, फलन्ति, फलानि, अपृच्छत् । |

4. मञ्जूषायां प्रदत्तपदानां सहायतया **पञ्चभि:** संस्कृतवाक्यै: 'विजयदशमी' इति विषयमधिकृत्य वर्णनं कुरुत । **1 × 5 = 5**

मञ्जूषा में दिए गए पदों की सहायता से **पाँच** संस्कृत वाक्यों में 'विजयदशमी' का वर्णन कीजिए ।

With the help of the words given in the box describe 'विजयदशमी' in **five** sentences in Sanskrit.

**मञ्जूषा**

| |
|---|
| रावणस्य, पुत्तलिका:, असत्योपरि, सत्यस्य, रामस्य, पराक्रमम्, अद्भुतं शौर्यम्, श्रीलङ्कायाम्, विजयद्योतकम्, पर्व, बालका: कुम्भकर्ण-मेघनादयो:, दह्यन्ते । |

## खण्ड: ग (SECTION C) — 30 अङ्का:

### अनुप्रयुक्तव्याकरणम्

### अनुप्रयुक्त व्याकरण

### Applied Grammar

5. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं कुरुत । **1 × 6 = 6**

निम्नलिखित वाक्यों में रेखांकित पदों का सन्धिच्छेद कीजिए ।

Disjoin Sandhis in the underlined words of the following sentences.

(i) आर्य ! निमन्त्रितोऽसि ।

(ii) चाणक्य: स्वप्नेऽपि न चेष्टते ।

(iii) धनैरपयश: ।

(iv) नृपेष्वमात्येषु च ।

(v) इत इतो देव: ।

(vi) ऋषयो ह्याप्तकामा: ।

6. अधोलिखितवाक्येषु रेखाङ्कितसमस्तपदानां विग्रहा: लेखनीया: । **1 × 6 = 6**

निम्नलिखित वाक्यों में रेखांकित समस्त पदों के विग्रह लिखिए ।

Expound the underlined words of the following sentences.

(i) अहिंसया च भूतात्मा ।

(ii) बहुमत्स्योऽयं ह्रद: ।

(iii) सर्वे यथास्थानम् उपविशन्ति ।

(iv) मूढधिय: पराभवं यान्ति ।

(v) ज्योत्स्नापरिक्षय: इव ।

(vi) सोच्छ्वासं मरणम् ।

7. अधोलिखितवाक्येषु कोष्ठकान्तर्गत-प्रकृतिं प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत । **1 × 8 = 8**

निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत दी गई प्रकृति के साथ निर्दिष्ट प्रत्यय को जोड़कर रिक्त स्थानों की पूर्ति कीजिए ।

Fill in the blanks in the following sentences by adding suffixes to the roots and words given in the brackets.

(i) एनम् एव ________ भवति । (आ + श्रि + क्त्वा)

(ii) अहो राजाधिराजमन्त्रिण: ________ । (वि + भू + क्तिन्)

(iii) तिष्ठ तिष्ठ न ________ । (गम् + तव्यत्)

(iv) प्रत्येकं छात्रेण संस्कृतम् अवश्यमेव ________ । (पठ् + अनीयर्)

(v) तस्य तं निश्चयं ________ । (ज्ञा + क्त्वा)

(vi) अत एव ________ इच्छामि । (श्रु + तुमुन्)

(vii) ________ एतत् सर: त्यक्तुं न शक्यते (पितृपितामह + ठक्)

(viii) लद्दाखे ________ नीलाकाश: छत्रवत् प्रतीयते । (आ + स्तृ + क्त)

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयो: अन्विति: क्रियताम् । **1 × 5 = 5**

निम्नलिखित वाक्यों में कर्ता एवं क्रियापदों की अन्विति कीजिए ।

Write the suitable verbs according to the subject in the following sentences.

(i) आर्य वैहीनरे ! सुगाङ्गमार्गम् _______ । (आदेशयत/आदेशय)

(ii) भो भो: पुरुषा: ! चन्दनवारिणा भूमिं _______ । (सिञ्चन्तु/सिञ्चतु)

(iii) नेपथ्ये वेतालिकौ काव्यपाठं _________ । (कुरुत/कुरुत:)

(iv) अहो ! कीदृशीयं हिमानी _______ । (राजते/राजसे)

(v) कथं मया सह ________ राक्षस: । (स्पर्धते/स्पर्धन्ते)

**अथवा/OR**

अधोलिखितेषु वाक्येषु विशेष्यै: सह मञ्जूषाया: विशेषणपदानि योजयत । **1 × 5 = 5**

निम्नलिखित वाक्यों में मञ्जूषा से विशेष्य के अनुसार विशेषण जोड़िए ।

Write the appropriate adjectives from the box with the qualifying nouns in the following sentences.

(i) तृणानि भूमिरुदकं वाक् चतुर्थी च _______ ।

(ii) _______ पथस्तत् कवयो वदन्ति ।

(iii) किन्तु न कदाचित् आर्यस्य _______ प्रवृत्ति: ।

(iv) तत्र ________ शल्यकार्यं वर्णितम् ।

(v) राजलक्ष्मी: हि _______ भवति ।

**मञ्जूषा**

| दुराराध्या, सूनृता, अष्टविधम्, निष्प्रयोजना, दुर्गम् । |
|---|

9. अधोलिखितेषु वाक्येषु कोष्ठकपदै: सह उपयुक्तविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत । **1 × 5 = 5**

निम्नलिखित वाक्यों में कोष्ठक में दिए गए शब्दों से उपयुक्त विभक्ति का प्रयोग कर रिक्त स्थानों की पूर्ति कीजिए ।

Fill in the blanks using appropriate case endings with the words given in the brackets in the following sentences.

(i) अद्‌भि: ________ शुध्यन्ति । (गात्र)

(ii) मानवजीवने ________ विना सफलता न लभ्यते । (परिश्रम)

(iii) अनागतविधाता ________ मत्स्यान् आहूय अवदत् । (सर्व)

(iv) अलम् अनेन ________ । (विनय)

(v) विपुलहिमराशिना _______ एते गिरय: शोभन्ते । (धवल)

## खण्ड: घ (SECTION D) 35 अङ्का:

### भाग – I

### PART – I

### पठितांश – अवबोधनम्

### पठितांश – अवबोधन

### Reading Comprehension

10. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् संस्कृतेनोत्तरत ।

निम्नलिखित गद्यांश, पद्य तथा नाट्यांश को पढ़कर उन पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following prose, verse and drama passages and answer the questions based on them in Sanskrit.

(क) **गद्यांश**:

"प्रियबान्धवा: । यूयं सर्वे दिल्लीस्थलौहस्तम्भेन परिचिता: एव । कोऽपि न अद्य यावत् जानाति कथं स: स्तम्भ: विकृतिं विना तथैव तिष्ठति । अन्ये विस्मयकरा: स्तम्भा: सन्ति – अहमदनगरे कम्पमाना: स्तम्भा: सुचिन्दरं देवालये स्थिता: सङ्गीतमया: स्तम्भा:, गोलकुण्डादुर्गे प्रतिध्वन्यात्मका: स्तम्भा: अद्य यावत् दिग्दिगन्तेषु अस्माकं भारतीयवैज्ञानिकानां गौरवगाथां वर्णयन्ति ।"

**प्रश्ना**:

(अ) एकपदेनोत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) लौहस्तम्भ: कुत्र वर्तते ?

(ii) संगीतमया: स्तम्भा: कुत्र सन्ति ?

(ब) पूर्णवाक्येनोत्तरत । **1**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

के भारतीयवैज्ञानिकानां गौरवगाथां वर्णयन्ति ?

(स) यथानिर्देशमुत्तरत ।

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(i) विस्मयकरा: इति विशेषणस्य विशेष्यं किम् ? ½

(ii) अस्मिन् अनुच्छेदे सम्बोधनपदं किम् ? ½

(iii) 'यशोगानम्' इत्यर्थे किं समानार्थकं पदमत्र प्रयुक्तम् ? **1**

(iv) 'प्रकृति:' इत्यस्य किं विलोमपदम् ? **1**

(ख) **पद्यम्**

"वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाच: ।
करणं परोपकरणं येषां केषां न ते वन्द्या: ।।"

**प्रश्ना** :

(अ) एकपदेनोत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) सज्जनानां वाणी कीदृशी भवति ?

(ii) सज्जनानां हृदयं कीदृशं भवति ?

(ब) पूर्णवाक्येनोत्तरत । **1**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

कीदृशा: जना: सदा वन्दनीया: भवन्ति ?

(स) यथानिर्देशमुत्तरत ।

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(i) 'मुखम्' इत्यस्य कृते किं पर्यायपदम् अत्र प्रयुक्तम् ? ½

(ii) 'विषम्' इत्यस्य विलोमपदं किम् ? ½

(iii) 'पूजनीया:' इत्यस्य स्थाने किं पदम् अत्र प्रयुक्तम् ? **1**

(iv) 'सुधामुच:' इति कस्य विशेष्यम् ? **1**

(ग) **नाट्यांश** :

"चाणक्य: : वृषल ! किमर्थं वयम् आहूता: ?

राजा : आर्यस्य दर्शनेन आत्मानम् अनुग्रहीतुम् ।

चाणक्य: : अलम् अनेन विनयेन । न निष्प्रयोजनं प्रभुभि: आहूयन्ते अधिकारिण: ।

राजा : आर्य ! कौमुदीमहोत्सवस्य प्रतिषेधे किं फलम् आर्य: पश्यति ?

चाणक्य: : (स्मितं कृत्वा) उपालब्धुं तर्हि वयम् आहूता: ।"

**प्रश्ना**:

(अ) एकपदेनोत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) वृषलेन क: आहूत: ?

(ii) अत्र कस्य प्रतिषेधस्य वर्णनम् अस्ति ?

(ब) पूर्णवाक्येनोत्तरत । **1**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

कस्य दर्शनेन राजा आत्मानम् अनुग्रहीतुम् इच्छति ?

(स) यथानिर्देशमुत्तरत ।

निर्देशानुसार उत्तर दीजिए ।

Answer as directed.

(i) 'स्वीकारे' इत्यस्य किं विलोमपदमत्र प्रयुक्तम् ? ½

(ii) 'पश्यति' इति क्रियापदस्य कर्तृपदं किम् ? ½

(iii) 'वृथा' इत्यर्थे किं पदम् अत्र प्रयुक्तम् ? **1**

(iv) 'वृषल' इति सम्बोधनं कस्मै प्रयुक्तम् ? **1**

11. यथानिर्देशं प्रश्न**द्वयम्** उत्तरत । **2 × 2 = 4**

यथानिर्देश **दोनों** प्रश्नों के उत्तर दीजिए ।

Answer **both** the questions as directed.

(i) 'धन्य एष कुलमूलं श्रीरामचन्द्रस्य ।' अस्या: पङ्क्ते: सन्दर्भग्रन्थस्य लेखकस्य च नामनी लिखत ।

(ii) 'सुखं हि दु:खान्यनुभूय शोभते यथान्धकारादिव दीपदर्शनम्' – इति श्लोकांशं क: कं प्रति वदति ?

12. प्रत्येकम् अंशस्य प्रदत्तभावार्थ**त्रयात् एकं** शुद्धं भावार्थं चित्वा लिखत । **2 + 2 = 4**

प्रत्येक अंश के लिए दिए गए **तीन** भावार्थों में से **एक** शुद्ध भावार्थ का चयन करके लिखिए ।

Pick out and write the correct **one** out of the **three** explanations given for each of the following lines.

(अ) 'स किंसखा साधु न शास्ति योऽधिपम् ।' ।

**भावार्था:**

(i) य: अधिपं नियन्त्रयति स किंसखा भवति ।

(ii) य: राजानं सम्यक् उपदिशति स किंसखा भवति ।

(iii) य: स्वस्वामिने सत्परामर्शं न ददाति स: योग्य: सचिव: भवितुं न शक्नोति ।

(ब) 'सुरक्षितं दैवहतं विनश्यति ।'

**भावार्था:**

(i) य: सुरक्षित: भवति स गृहे न विनश्यति ।

(ii) दैवे प्रतिकूले सर्वे यत्ना: विफला: भवन्ति ।

(iii) भाग्यवान् नर: गृहे अपि मृत्युं प्राप्नोति ।

**अथवा / OR**

अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत । **1 × 4 = 4**

निम्नलिखित पद्य के भावार्थ को मञ्जूषा में दिए गए पदों से पूर्ण कर पुनः लिखिए ।

Complete the central idea of the given verse with the words given in the box and rewrite the same.

"अद्भिः शुध्यन्ति गात्राणि बुद्धिः ज्ञानेन शुध्यति ।
अहिंसया च भूतात्मा मनः सत्येन शुध्यति ।।"

**भावार्थः**

अस्माकं (1) जलेन स्वच्छं पवित्रं भवति, बुद्धिः च (2) शुद्धा भवति, यथा यथा वयं ज्ञानं प्राप्नुमः, अस्माकं बुद्धिः पवित्रा भवति । मनुष्यस्य (3) अहिंसया शुद्धः भवति (4) च आचरणेन मनः पवित्रं भवति ।

**मञ्जूषा**

| |
|---|
| सत्यस्य, आत्मा, शरीरम्, ज्ञानेन । |

13. अधोलिखितस्य श्लोक**द्वयस्य** अन्वययोः मञ्जूषातः पदैः रिक्तस्थानानि पूरयित्वा अन्वयं पुनः लिखत । **½ × 8 = 4**

निम्नलिखित **दो** श्लोकों के अन्वयों में मञ्जूषा के पदों से रिक्त स्थानों की पूर्ति कर अन्वय को पुनः लिखिए ।

The prose order renderings of the following **two** verses have been given below. Fill in the blanks from the words given in the box and rewrite the same.

(अ) "अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम् ।
आश्रितव्योऽथवा दुर्गः नान्या तेषां गतिर्भवेत् ।।"

**अन्वयः**

(1) बलिनः शत्रोः (2) कर्तव्यम्, अथवा (3) आश्रितव्यः (4) अन्या गतिः न भवेत् ।।

(ब) "व्रजन्ति ते मूढधियः पराभवम्,
भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधान्
असंवृत्ताङ्गान्निशिता इवेषवः ।।"

**अन्वयः**

ये (1) मायिनः न भवन्ति ते (2) पराभवं व्रजन्ति । शठाः हि (3) इषव इव तथाविधान् (4) प्रविश्य घ्नन्ति ।।

**मञ्जूषा**

| |
|---|
| मायाविषु, अशक्तैः, मूढधियः, प्रपलायनम्, निशिताः, दुर्गः, असंवृत्ताङ्गान्, तेषाम् । |

14. अधोलिखितानां **'क'** – स्तम्भस्य वाक्यांशानां **'ख'** – स्तम्भस्य वाक्यांशैः सह सार्थकसम्मेलनं कृत्वा वाक्यानि पुनः लिखत । **1 × 4 = 4**

निम्नलिखित **'क'** स्तम्भ के वाक्यांशों का **'ख'** स्तम्भ के वाक्यांशों के साथ सार्थक मिलान कर वाक्यों को पुनः लिखिए ।

Match the following sentences of the column **'क'** with the suitable sentences of column **'ख'** and rewrite the same.

| **(क)** | **(ख)** |
|---|---|
| (i) मठेषु उत्कीर्णाः लेखाः | (a) चाणक्यः स्वप्नेऽपि चेष्टते । |
| (ii) यदि स्वर्णम् अशुद्धं भवेत् | (b) षण्णाम् ऋतूनाम् । |
| (iii) अयमेव कारणं | (c) तर्हि चतुर्गुणेन सीसेन शोधयेत् । |
| (iv) न प्रयोजनमन्तरा | (d) तिब्बतशैल्याः परिचायकाः । |

15. अधोलिखितेषु वाक्येषु रेखाङ्कितशब्दानां प्रसङ्गानुसारं सार्थकम् अर्थं चित्वा लिखत । **1 × 4 = 4**

निम्नलिखित वाक्यों में रेखांकित शब्दों के प्रसंगानुसार सार्थक अर्थ चुनकर लिखिए ।

Select and write the appropriate meanings of the underlined words in the following sentences.

(अ) '<u>संविधा</u> विहिता न वेति गेहं गत्वा जानामि ।'
   (i) संविधानम्
   (ii) भोज्यव्यवस्था
   (iii) संगीतिः

(ब) '<u>दुर्गसंस्कारः</u> प्रारब्धव्यः ।'
   (i) विवाहसंस्कारः
   (ii) दुर्गसंस्कृतिः
   (iii) सेनासंग्रह - दुर्गपरिष्कारादि कर्म ।

(स) 'न खलु आर्यचाणक्येन अपहृतः <u>प्रेक्षकाणां</u> चक्षुषो विषयः ?'
   (i) आलोचकानाम्
   (ii) दर्शकानाम्
   (iii) अभिनेतॄणाम् ।

(द) 'हिमं <u>गिरिराजस्य</u> शोभां प्रवर्धयति ।'
   (i) गिरनारनगरस्य
   (ii) हिमालयस्य
   (iii) गुजरातस्य ।

## खण्ड: घ (SECTION D) 10 अङ्का:

### भाग – II

### PART – II

### सामान्य: संस्कृतसाहित्यपरिचय:

### सामान्य संस्कृत साहित्य-परिचय

### General Introduction to Sanskrit Literature

16. (अ) अधोलिखितेषु कस्य अपि **एकस्य** संक्षिप्त: परिचय: **पञ्चभि:** वाक्यै: संस्कृतेन लेख्य: । $1 \times 5 = 5$

निम्नलिखित में से किसी **एक** का संक्षिप्त परिचय **पाँच** वाक्यों में संस्कृत में लिखिए ।

Write a brief note on any **one** of the following in **five** sentences in Sanskrit.

विशाखदत्त:, विष्णुशर्मा, भारवि: ।

**अथवा / OR**

अधोलिखितेषु मञ्जूषापदसहायतया रिक्तस्थानानि पूरयित्वा पुन: लिखत । $\frac{1}{2} \times 10 = 5$

निम्नलिखित में मञ्जूषा के पदों की सहायता से रिक्त स्थानों की पूर्ति कर पुन: लिखिए ।

Fill in the blanks in the following using the words from the box and rewrite the same.

(i) रामायणम् _________ कथ्यते ।

(ii) महाकाव्ये ________ न भवति ।

(iii) त्रयोदशलघुनाटकानां रचयिता ________ अस्ति ।

(iv) भर्तृहरिणा __________ शतकानि लिखतानि ।

(v) मेघदूतं _________ अस्ति ।

(vi) वेदव्यासेन ________ लिखितम् ।

(vii) ईशोपनिषद् ________ चत्वारिंशत्तम: अध्याय: ।

(viii) राजनीतिकं घटनाचक्रम् अधिकृत्य ________ मुद्राराक्षसं विरचितम् ।

(ix) नाटकस्य प्रारम्भे विघ्नविनाशाय ________ क्रियते ।

(x) पञ्चतन्त्रस्य गणना _________ विधीयते ।

**मञ्जूषा**

| |
|---|
| नीतिकथासाहित्ये, आदिकाव्यम्, नान्दी, गद्यम्, विशाखदत्तेन, भास:, यजुर्वेदस्य, त्रीणि, महाभारतम्, गीतिकाव्यम् । |

(ब) महाकाव्यस्य का: अपि **पञ्च** विशेषता: संस्कृतेन लिखत । $1 \times 5 = 5$

महाकाव्य की किन्हीं **पाँच** विशेषताओं को संस्कृत में लिखिए ।

Write any **five** characteristics of the Mahakāvya in Sanskrit.